NĀRĀYAṆAPADABHŪṢAṆAM

Edited By Pandit V. Krishnamacharya

INTRODUCTORY NOTE

The *Nārāyaṇapadabhūṣaṇa* is a remarkable metrical monograph. It seeks to prove that the name Nārāyaṇa occurring in the Upaniṣad-s and other sacred texts of the Hindus does not refer exclusively to Viṣṇu, but is meant to refer to Śiva as well. To establish this liberal view, the author Śeṣādrisūri probes the nature of the contents of various scriptural texts and concludes that the name Nārāyaṇa may very well be held to denote Śiva also. In the author's own commentary on his verses (available in the same codex as the text) he learnedly discusses the grammatical rules and views expressed by Pāṇini, Kātyāyana, Patañjali, Vāmana, Haradatta and Bhaṭṭoji on the conversion of the syllable *na* in *ayana* into *ṇa* in the name Nārāyaṇa.

The text consists of 43 verses in all, the first six being *āryā-s*, and the rest in the *vasantatilaka* metre. This work is also known as the *Tattvamālā* (the graland of verities), because the aim of the author is to offer it to Śiva as if it were a garland of the flowers of Śaivite philosophical doctrines. Of the 43 verses, 36 deal with the main topic; they are also held to represent the 36 *tattva-s* or categories recognized in the Śaiva Philosophy.

In his commentary, the author refers to himself as the pupil of Rāmasvāmisūri and the son of Venkaṭeśasūri of the Ātreya lineage. As he quotes Bhaṭṭoji (16th century A.D.) and does not refer to Nāgeśa (*c.* 18th century), he may be assigned to a date between the 16th and the 18th centuries. Further, the author refers in his commentary to another work of his called *Śabdatāṇḍava.* The masterly manner in which he manipulates the grammatical rules relevant to the questions under discussion makes it amply clear that the author himself is a master grammarian. Therefore he may be tentatively identified with the author of the *Paribhāṣābhāskara.*

नारायणपदभूषणम्

शेषाद्रिसूरिकृतम्

नत्वा गुरुचरणाम्बुजमम्बां
वागीश्वरीं च वाक्सिद्ध्यै ।
नारायणपदभूषण-
मारचये शंकरप्रीत्यै ॥ 1 ॥
नाहं शिवपारम्य-
प्रकाशने व्याप्रिये निराबाधे ।
दीक्षित-हरदत्तादिम-
विद्वद्वाङ्मुखदिगन्तविश्रान्ते ॥ 2 ॥
किं तर्हि यदा तम इति
मन्त्रेण समस्तसृष्टिवाक्यानाम् ।

साम्बशिवे तात्पर्यं
निरणायि सुखेन **दीक्षितवरेण्यैः** ।। 3 ।।
नारायणनाम्नोऽपि च
लक्षणया योगरूढ्या च ।।
पौराणिक्या योजन-
मकारि तैरेव शशिकलोत्तंसे ।। 4 ।।
केचन [1]मूर्खा णत्वं
बाधत इति दीक्षितैरभाणीति ।
प्रवदन्ति तन्मुधेति
स्फुरति **शिवादित्यमणिदीपिका**दिदृशाम् ।। 5 ।।
अधुना यदि विधुचूडे
नारायणनाम यौगिकमथापि ।
णत्वे नानुपपत्ति-
र्लगतीति वयं यथामति वदामः ।। 6 ।।
श्रीमन् पुमर्थवरकारणमात्मविद्या
तल्लक्षणं च जगदुद्भवनादिकृत्त्वम् ।
त्वय्येव तत्तु गिरिश श्रुतिमौलिसिद्धं
तस्मात् त्वदङ्घ्रियुगमेव परा गतिर्नः ।। 7 ।।
शंभो विराजति यदा तममन्त्रगम्ये
सृष्ट्यादिबोधिवचसां त्वयि तत्परत्वे ।
लक्ष्माधिमाधवमिदं लघुशेमुषीकैः
षष्ठान्त्यनीतिमविलङ्घ्य कथं नु नीतम् ।। 8 ।।
नारायणादिपदयुक्तमपि प्रपञ्च-
सृष्ट्यादिबोधिवचनं **मखिराजवर्यैः** ।

[1] विबुधा

आलम्ब्य लाक्षणिकतां त्वयि योगरूढिं
पौराणिकीं च परमेश्वर साधु नीतम् ॥ 9 ॥
श्रीमन् श्रुतिस्मृतिसमस्तपुराणसिद्ध-
नारायणाह्वयमहत्तरयोगरूढौ ।
त्वय्यद्य योगमपि केवलमिन्दुमौले
संसाधयामि परिधूतसमस्तदोषम् ॥ 10 ॥
केचित्तु णत्वमिह केवलयोगपक्षे
न स्यादिति प्रविलपन्ति नगेन्द्रचापे ।
तेषां समानपदभावविचारहीना
बुद्धिः कथं भवति चेतनतानिदानम् ॥ 11 ॥
संप्राप्तणत्वमपि पूर्वपदादितीदं
सूत्रं रुणद्धि नियमार्थमिहेति केचित् ।
अप्राप्तिरेव खलु तान् द्रुणसादिसंज्ञा-
शब्देषु ताडयति शंकर किं करोमि ॥ 12 ॥
कात्यायनीयमपदादिविधावितीदं
तच्छब्दसंव्यवहृतिस्थल एव चेत् स्यात् ।
तद्भाष्यभागगतशङ्कनतन्निरास-
मान्द्यं तु कः परिहरेद् महिलार्धमूर्ते ॥ 13 ॥
पद्मोद्भवादिषु च णत्वविशिष्टयोगः
कौर्मादिषु स्फुरति तत् त्वयि नाम योगम् ।
यो वालिशोऽपलपति स्फुटमेष वैरा-
द्वेवत्वमप्यहह शंकर निह्नुवीत ॥ 14 ॥
नानाविधैर्भवति **कूर्मपुराण**मुख्यै-
रुद्घोषितेऽप्यवयवार्थनिरुक्तिजाले ।
संदेग्धि यः पुररिपो कृतवाजपेये
यज्ञोपवीतधरणेऽपि स संशयीत ॥ 15 ॥

प्राचीनभक्ततति**रप्पयदीक्षि**तादिः
पूर्वोक्तराजपदवीमनुसृत्य णत्वम् ।
प्रासाधयद्यदपदेति पदस्य शक्तिं
प्रौढ्यावलम्ब्य हर हानिरिहेयता का ।। 16 ।।

श्रीमान् **पतञ्जलि**रपि प्रथमं प्रदूष्य
कात्यायनीयवचनं तत एनमेव ।
णत्वस्य साधनविधिं मदनान्तकाभि-
प्रेत्यैव नञ्विरहितं तु पपाठ वाक्यम् ।। 17 ।।

त्वद्भक्तिहीनतरमूढजनाप्रकाश्यं
मत्वेममाशयमयं खलु **भाष्यकारः** ।
अन्यादृशातिलघुपातनिकामुखेन
भूतेश नञ्रहित**वार्तिक**माचचक्षे ।। 18 ।।

एवं सतीन्दुधर शंकरयानमुख्य-
शब्देषु णत्वमुदियादिति यत्तु चोद्यम् ।
तद्**वृत्तिकार**मुखशाब्दिकसंगृहीत-
क्षुभ्नादिपाठगतिविस्मरणप्रयुक्तम् ।। 19 ।।

णत्वाधिकारगतसूत्रझरीविरोध-
चोद्यानि वा लगति नास्मदुदीरितार्थे ।
विध्यर्थतानियमतत्परताविभागे
शीतांशुखण्डधर शिक्षितमानसानाम् ।। 20 ।।

ये त्वाग्निमारुतमुखेषु पदेषु वृद्धि-
हानिर्विरोधकृदिति प्रलपन्ति तेषाम् ।
दीर्घाच्चसूत्रपरिसूचितवृद्धिलाभ-
श्चेतःपदं न लगति त्रिपुरान्तकारे ।। 21 ।।

केचित् समानपदनिर्वचनेन योगं
त्वय्यन्तकान्तक निवर्तयितुं प्रवृत्ताः ।

नानाविकल्पजटिलं स्वमतं विहाय
तेऽप्यस्मदुक्तपदवीमवतेरुरेव ।। 22 ।।

केचिद्यदाष्टमिक**वार्त्तिक**गीर्विरुद्धा
विध्यर्थता गिरिश पूर्वपदेति सूत्रे ।
इत्याहुरेतदपदादिपदप्रयोग-
माहात्म्यबोधविरहैककृतं प्रतीमः ।। 23 ।।

यच्चोद्यमाष्टमिक**भाष्य**झरीविरुद्धा
नारायणेति पदयोजनिका त्वयीति ।
त्वत्पादभूषणझलंझलभावराव-
धीवैधुरीकृतमिदं खलु मुग्धमौले ।। 24 ।।

पाश्चात्य**भाष्य**वचसो वहुषु स्थलेषु
प्राचीन**भाष्य**पदवीमनुसृत्य दृष्टा ।
प्रौढया प्रवृत्तिरिति सम्यगभाणि शंभो
भट्टोजियज्वभिरतो मम कोऽपराधः ।। 25 ।।

शंभो **पतञ्जलि**यथाश्रुतभाषणोज्झं
तद्गूढभावमहिमैष वहुस्थलेषु ।
भट्टोजियज्वभिरदर्शि तदुक्तरीत्या
त्वय्येष योगमहिमापि निरङ्कुशोऽद्य ।। 26 ।।

दक्षात्मजातनयवामनमाधवानां
प्रामाण्यवाक् **कततनूजपुराणकर्त्रोः** ।
यन्न स्फुरत्यहह शंकर मानता तत्
त्वत्पादभक्तिविरहैकनिदानमेव ।। 27 ।।

योगात्मके तव महेश्वर वस्तुतस्तू-
पेये विरोध इह दोषकृदेष नास्ति ।
सन्नप्युपायगत एष न दोष एवे-
त्यङ्गीकृतं बहुभिरेव निबन्धकारैः ।। 28 ।।

नैवोररीकृत उपेय इहैष कैश्चि-
दित्युक्तिरीश कुमतेरपहासयोग्या ।
श्रीव्यास एव तव योगमुपेयभूतं
स्कान्दे ह्यनेकवचनैः प्रकटीचकार ।। 29 ।।

कौर्मे स्फुटं गिरिश मन्दमतेरपि त्व-
द्योगं यदन्यथयितुं कुधियो यतन्ते ।
तत् **कूर्म**गूढतरभावविवेकलेश-
हीनत्वमेव परिबोधयति स्म तेषाम् ।। 30 ।।

त्वद्रूढिबोधि**हरिवंश**वचो गिरीश
संकोचयन्त्यहह **वामन**वाक्यतो ये ।
तेषां तु तन्निगममूलकतावबोध-
संकोच एव खलु सर्वजनप्रसिद्धः ।। 31 ।।

राजत्य**थर्वशिरसि** स्मरहंस्त्वदन्त-
र्यामित्वसाधनचणा तव रूपपृच्छा ।
इत्थं च **वामनव**चः समुपाश्रयन्त-
स्तद्वामनस्य कथमालपितुं यतन्ते ।। 32 ।।

कौर्मे चतुर्मुखशिशावपि चन्द्रमौले
नारायणाह्वयनिरूढिरुदीर्यमाणा ।
ऐकान्त्यमब्जनयने निरुणद्धचमुष्या--
स्तस्मादियं त्वयि विराजति निर्विवादा ।। 33 ।।

एवं स्थितावपि विभो कपिमुष्टिनीत्या
कात्यायनीयमपदादिविधावितीदम् ।
तच्छब्दसंव्यवहृतिस्थल एव चेत् स्याद्
दोषस्तथापि न भवेदिति वर्णयामः ।। 34 ।।

उच्चाटितद्गुणसदेशमपि स्मरारे
देशान्तराप्तविधिपूर्वपदादितीदम् ।

योगं रुणद्धि न तवेत्थमचेतनेऽपि
विद्वेषिचेतनजनस्य कथं न लज्जा ।। 35 ।।

त्वद्योगरोधनभयादफलत्वतश्चा-
चिक्षेप नोत्तरपदं खलु सूत्रमेतत् ।
एवं च मध्यमपदे कृतसंविधानं
त्वद्योगमेव समुपास्त उमार्धमूर्ते ।। 36 ।।

त्वद्द्वेषिकल्पितकुदूषणलेशगन्धो
योगं यथैव तव नाक्रमते पुरारे ।
नारायणाह्वयजुषं तनुमस्तथैव
किं किं न कारयति तेऽद्य कृपानवद्या ।। 37 ।।

त्वद्भक्त**दीक्षित**वरैस्त्वयि भाविकृष्णा-
वस्थत्वमिन्दुधर लक्षणया प्रयोगे ।
मूलं यदीरितमिदं खलु निर्विवादं
विष्णोर्जनिः शशिधरान्निगमान्तसिद्धा ।। 38 ।।

निर्मत्सराकलितनामवरेण्यभूत-
नारायणार्थपरिशोधनयापि शंभो ।
त्वत्तो जनिर्भगवतः कमलाधिनेतु-
रागोपकन्यकमियं खलु सुप्रसिद्धा ।। 39 ।।

आपाततस्तव हरेरपि बोधको यो
मूलश्रुतेः स्वरसतश्च भवत्परत्वम् ।
प्राप्तो महेश्वर मनोस्तदुपक्रमं त्व-
दाच्छिद्य माधवपरं ब्रुवते कथं वा ।। 40 ।।

नारायणार्थपरिशोधनमानवस्मृ-
त्युद्घोषिता हरिजनिर्गुणछद्रतः स्यात् ।
न त्वत्त इत्यभिदधाति गिरीश मूढः
कश्चित्तु तस्य तव चाप्यभिधामबुद्ध्वा ।। 41 ।।

अस्मत्प्रणीतसरणौ व्रजतां न पूर्वै-
व्याकर्तृभिः सह विरोध उदेति दोषः ।
यत्ते परस्परविरोधकरालचित्ता
भूतेश शिष्टचरितं हि महत् प्रमाणम् ॥ 42 ॥
एतां वसन्ततिलकाकृततत्त्वमालां
नारायणीयपदभूषणमर्पयामि ।
शंभो तवाङ्घ्रियुगले शिशुनिर्मितस्र-
ग्व्यत्यस्तविन्यसनवत्यपि तुष्टिदा हि ॥ 43 ॥

———